# Shri Bala Stotram 3

# શ્રીબાલાસ્તોત્રમ્ 3

## Document Information

Text title : Shri Bala Stotram 3

File name : bAlAstotram3.itx

Category : devii, dashamahAvidyA, devI

Location : doc_devii

Proofread by : PSA Easwaran psaeaswaran at gmail.com

Description/comments : bAlAsaparyA saparyAkrama-nAmAvalI-stotrAdisaNgrahaH

Latest update : March 21, 2020

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

March 22, 2020

*sanskritdocuments.org*

# Shri Bala Stotram 3

# શ્રીબાલાસ્તોત્રમ્ ૩

ઉદઞ્ચદ્દિનેશપ્રપઞ્ચપ્રકાશાં
    ઉદૂઢેન્દુરેખામુદારાં ત્રિણેત્રામ્ ।
વહન્તીં વરાભીતિકોશાક્ષમાલાઃ
    વસન્તીં સ્ફુટે પદ્મકે નૌમિ બાલામ્ ॥ ૧॥

નતાનાં જનાનાં સમસ્તર્ધિદાત્રીં
    સુયોન્યાખ્યમુદ્રાભિગમ્યાં શરણ્યામ્ ।
સુવાક્કામશક્ત્યાખ્યબીજત્રયાન્તઃ-
    સ્થિતાં બાલિકાં ત્વાં નમામિ સ્મરામિ ॥ ૨॥

લસદ્રક્તસિન્દૂરવર્ણાં કરાબ્જૈઃ
    વરાભીતિપુસ્તાક્ષમાલા દધાનામ્ ।
સિતાર્ધેન્દુફાલાં વરેણ્યાં ત્રિનેત્રાં
    શિવાં બાલિકાં ત્વાં નમામિ સ્મરામિ ॥ ૩॥

કુન્દમુકુલાગ્રદન્તાં કુઙ્કુમપઙ્કેન લિપ્તતનુમધ્યામ્ ।
આરક્તદેહકાન્તિં બાલામખિલાણ્ડનાયિકાં વન્દે ॥ ૪॥

માલાસૃણીપુસ્તકપાશહસ્તાં બાલાં ભજેઽહં લલિતાકુમારીમ્ ।
કુમારકામેશ્વર કેલિલોલાં નમામિ ગૌરીં નવવર્ષદેશ્યામ્ ॥ ૫॥

સાક્ષસ્રજં ચ વરદાભય પુસ્તકોદ્યદ્ -
    બાહામયુગ્મનયનામમલાબ્જસંસ્થામ્ ।
અચ્છાઙ્ગરાગવસનાપધનાં નમામિ
    બાલેન્દુમૌલિમનિશં વચસામધીશામ્ ॥ ૬॥

ઇતિ શ્રીબાલાસ્તોત્રમ્ (૩) સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Bala Stotram 3*

pdf was typeset on March 22, 2020

Please send corrections to *sanskrit@cheerful.com*